# Siddhivinayaka Shodashopachara Pujastutih 2

# સિદ્ધિવિનાયકષોડશોપચારપૂજાસ્તુતિઃ ૨

## Document Information

Text title : Siddhivinayaka Shodashopachara Pujastutih 2

File name : siddhivinAyakaShoDashopachArapUjAstutiH2.itx

Category : ganesha, pUjA, ShoDasha, stuti

Location : doc_ganesha

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 4

Latest update : October 10, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 10, 2026

*sanskritdocuments.org*

# સિદ્ધિવિનાયકષોડશોપચારપૂજાસ્તુતિઃ ૨

હૃત્પદ્મકર્ણિકામધ્યાત્સિદ્ધ્યા દેવ્યા ગજાનન ।
આગચ્છ ત્વં મહાદેવ સર્વૈરાવરણૈઃ સહ ॥

દેવેશ ભક્તસુલભ પરિવારસમન્વિત ।
યાવત્ત્વાં પૂજયિષ્યામિ તાવદેવ ઇહાવહ ॥

આગચ્છ ભગવન્દેવ સ્થાને ચાત્ર સ્થિતો ભવ ।
યાવત્પૂજાં કરિષ્યામિ તાવત્ત્વં સન્નિધૌ ભવ ॥ (આવાહનં)
તવેયં મહિમા મૂર્તિઃ તસ્યાં ત્વં સર્વગઃ પ્રભો ।
ભક્તિસ્નેહસમાકૃષ્ટ દીપવત્સ્થાપયામ્યહમ્ ॥ (સ્થાપનં)
અનન્યા તવ દેવેશ મૂર્તિશક્તિરિયં પ્રભો ।
સાન્નિધ્યં કુરુ તસ્યાં ત્વં ભક્તાનુગ્રહતત્પર । (સન્નિધાપનં)
આજ્ઞા તવ દેવેશ કૃપામ્ભોધે ગુણામ્બુધે ।
આત્માનન્દૈકતૃપ્તં ત્વાં નિરુણધ્મિ પિતર્ગુરો ॥ (સન્નિરોધનં)
અજ્ઞાનાદ્દુર્મનસ્ત્વાદ્વા વૈકલ્યાત્સાધનસ્ય ચ ।
યદપૂર્ણં ભવેત્કૃત્યં તદપ્યભિમુખો ભવ ॥ (અભિમુખીકરણમ્)
અભક્તવાઙ્મનશ્ચક્ષુઃ શ્રોત્રદૂરાતિગદ્યુતે ।
સ્વતેજઃ પિઞ્જરેણાશુ વેષ્ટિતો ભવ સર્વતઃ ॥ (અવકુણ્ઠનં)
યસ્ય દર્શનમિચ્છન્તિ દેવાઃ સ્વાભીષ્ટસિદ્ધયે ।
તસ્મૈ તે પરમેશાય સ્વાગતં સ્વાગતં ચ તે । (સ્વાગતમ્)
દેવં દેવ મહારાજપ્રિયેશ્વર પ્રજાપતે ।
આસનં દિવ્યમીશાન દાસ્યેઽહં પરમેશ્વર ॥ (આસનમ્)
અપરાધો ભવત્યેવ સેવકસ્ય પદે પદે ।
કોઽપરઃ સહતાં લોકે કેવલં સ્વામિનં વિના ॥

સ્વાગતં દેવદેવેશ મદ્ભાગ્યાત્ત્વમિહાગતઃ ।
પ્રાકૃતં માં ચ દૃષ્ટ્વા ત્વં બાલવત્પરિપાલય ॥ (પ્રાર્થના)

યદ્ભક્તિલેશસમ્પર્કાત્ પરમાનન્દ સમ્ભવઃ ।
તસ્મૈ તે ચરણાબ્જાય પાદ્યં શુદ્ધાય કલ્પયે ॥ (પાદ્યમ્)
તાપત્રયહરં દિવ્યં પરમાનન્દલક્ષણમ્ ।
તાપત્રયવિનિર્મુક્ત તવાર્ઘ્યં કલ્પયામ્યહમ્ ॥ (અર્ઘ્યં)
વેદાનામપિ દેવાય વેદાનાં ફલિતાત્મને । -
આચમં કલ્પયામીશ શુદ્ધાનાં શુદ્ધિહેતવે । (આચમનં)
કાંસ્યે કાંસ્યેન પિહિતો દધિમધ્વાજ્યસંયુતઃ ।
મધુપર્કો મયાનીતઃ પૂજાર્થં પ્રતિગૃહ્યતામ્ ॥ (મધુપર્કઃ)
ગઙ્ગાસરસ્વતીરેવાકાવેરીનર્મદાજલૈઃ ।
સ્નાપિતોઽસિ મયા દેવ તથા શાન્તિં કુરુષ્વ મે ॥ (સ્નાનમ્)
તરુપુષ્પસમુદ્ભૂતં સુસ્વાદુ મધુરં મધુ ।
તેજઃ પુષ્ટિકરં દિવ્યં સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ (મધુસ્નાનં)
કામધેનુ સમુત્પન્નં સર્વસન્તોષકારકમ્ ।
પયસ્તુભ્યં પ્રયચ્છામિ સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ (ક્ષીરસ્નાનં)
પયસસ્તુ સમુદ્ભૂતં મધુરામ્લં શશિપ્રભમ્ ।
દધ્યાનીતં મયા દેવ સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ (દધિસ્નાનં)
નવનીતસમુત્પન્નં સર્વસન્તોષકારકમ્ ।
ઘૃતં તુભ્યં પ્રદાસ્યામિ સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ (ઘૃતસ્નાનં)
ઇક્ષુસારસમુદ્ભૂતા શર્કરા પુષ્ટિકારિકા ।
મલાપહારિકા દિવ્યા સ્નાનાર્થં પ્રતિગૃહ્યતામ્ । (શર્કરાસ્નાનં)
પયો દધિ ઘૃતં ચૈવ શર્કરામધુસંયુતમ્ ।
પઞ્ચામૃતં મયાઽઽનીતં સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ (પઞ્ચામૃતમ્)
મન્દાકિન્યાસ્તુ યદ્વારિ સર્વપાપહરં શુભમ્ ।
તદિદં કલ્પિતં દેવ સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ (શુદ્ધોદકસ્નાનં)
સર્વભૂષાધિકે સૌમ્યે લોકલજ્જાનિવારણે ।
મયોપપાદિતે તુભ્યં વાસસી પ્રતિગૃહ્યતામ્ ॥ (વસ્ત્રં)
અલઙ્કારાન્મહાદિવ્યાન્ નાનારત્નવિનિર્મિતાન્ ।
ગૃહાણ દેવ દેવેશ પ્રસીદ પરમેશ્વર ॥ (આભરણાનિ)
નવભિસ્તન્તુભિર્યુક્તં ત્રિગુણં દેવતામયમ્ ।
ઉપવીતં ચોત્તરીયં ગૃહાણ પરમેશ્વર । (ઉપવીતમ્)
શ્રીખણ્ડં ચન્દનં દિવ્યં ગન્ધાઢ્યં સુમનોહરમ્ ।
વિલેપનં સુરશ્રેષ્ઠ ચન્દનં પ્રતિગૃહ્યતામ્ ॥ (ગન્ધાન્)

અક્ષતાશ્ચ સુરશ્રેષ્ઠ કુઙ્કુમાક્તાઃ સુશોભિતાઃ ।
મયા નિવેદિતા ભક્ત્યા ગૃહાણ પરમેશ્વર ॥ (અક્ષતાન્)
માલ્યાદીનિ સુગન્ધીનિ માલત્યાદીનિ વૈ પ્રભો ।
મયાઽઽનીતાનિ પુષ્પાણિ ગૃહાણ પરમેશ્વર । (પુષ્પાણિ)
વનસ્પતિરસોદ્ભૂતો ગન્ધાઢ્યો ગન્ધ ઉત્તમઃ ।
આઘ્રેયઃ સર્વદેવાનાં ધૂપોઽયં પ્રતિગૃહ્યતામ્ ॥ (ધૂપમ્)
સુપ્રકાશો મહાદીપઃ સર્વતસ્તિમિરાપહઃ ।
સબાહ્યાભ્યન્તરં જ્યોતિઃ દીપોઽયં પ્રતિગૃહ્યતામ્ । (દીપમ્)
સત્પાત્રસિદ્ધં સુહવિઃ વિવિધાનેક ભક્ષણમ્ ।
નિવેદયામિ દેવેશ સાનુગાય ગૃહાણ તત્ ॥

બ્રહ્મેશાદ્યૈઃ સરસમભિતઃ સૂપવિષ્ટૈઃ સમન્તાત્
સિઞ્ચદ્બાલવ્યજનનિકરૈર્વીજ્યમાનઃ સખીભિઃ ।
નર્મક્રીડા પ્રહસનપરાન્ પઙ્ક્તિભોક્તૄન્ હસન્વૈ
ભુઙ્ક્તે પાત્રે કનકઘટિતે ષડ્રસાન્ શ્રીગણેશઃ ॥

શાલીભક્તં સુપક્વં શિશિરકરસિતં પાયસાપૂપસૂપં
લેહ્યં પેયં ચ ચોષ્યં સિતમમૃતફલં દ્વારિકાદ્યં સુખાદ્યમ્ ॥

આજ્યં પ્રાજ્યં સુભોજ્યં નયનરુચિકરં રાજિકૈલામરીચ
સ્વાદીયઃ શાકરાજી પરિકરમમૃતાહારજોષં જુષસ્વ ॥ (અન્તઃ પટં નિવેદનમ્)
નમસ્તે દેવદેવેશ સર્વતૃપ્તિકરં પરમ્ ।
અખણ્ડાનન્દસમ્પૂર્ણં ગૃહાણ જલમુત્તમમ્ ॥ (પાનીયમ્)
પૂગીફલં મહદ્દિવ્યં નાગવલ્લીદલૈર્યુતમ્ ।
એલા ચૂર્ણાદિભિર્યુક્તં તામ્બૂલં પ્રતિગૃહ્યતામ્ ॥ (તામ્બૂલમ્)
ઇદં ફલં મયા દેવ સ્થાપિતં પુરતસ્તવ ।
તેન મે સત્ફલાવાપ્તિઃ ભવેજ્જન્મનિ જન્મનિ ॥ (ફલમ્)
કદલીગર્ભસમ્ભૂતં કર્પૂરં ચ પ્રદીપિતમ્ ।
આરાર્તિકમહં કુર્વે પશ્ય મે વરદો ભવ ॥ (કર્પૂરનીરાજનમ્)
યાનિ કાનિ ચ પાપાનિ જન્માન્તરકૃતાનિ વૈ ।
તાનિ તાનિ વિનશ્યન્તિ પ્રદક્ષિણપદે પદે । (પ્રદક્ષિણમ્)
નાના સુગન્ધિ પુષ્પાણિ યથાકાલોદ્ભવાનિ ચ ।
પુષ્પાઞ્જલિં મયા દત્તં ગૃહાણ પરમેશ્વર ॥ (પુષ્પાઞ્જલિઃ)
જ્ઞાનતોઽજ્ઞાનતો વાપિ યન્મયા ક્રિયતેઽનિશમ્ ।

મમ કૃત્યમિદં સર્વં ઇતિ દેવ ક્ષમસ્વ મે ॥

અપરાધસહસ્રાણિ ક્રિયન્તેઽહર્નિશં મયા ।
દાસોઽહમિતિ માં મત્વા ક્ષમસ્વ પરમેશ્વર ॥

અપરાધો ભવત્યેવ સેવકસ્ય પદે પદે ।
કોઽપરઃ સહતાં લોકે કેવલં સ્વામિનં વિના ॥

ભૂમૌ સ્ખલિતપાદાનાં ભૂમિરેવાવલમ્બનમ્ ।
ત્વયિ જાતાપરાધાનાં ત્વમેવ શરણં પ્રભો ।
આવાહનં ન જાનામિ ન જાનામિ વિસર્જનમ્ ।
પૂજાવિધિં ન જાનામિ ત્વં ગતિઃ પરમેશ્વર ।
કર્મણા મનસા વાચા ત્વત્તો નાન્યા ગતિર્મમ ।
અન્તશ્ચરસિ ભૂતાનાં ઇષ્ટસ્ત્વં પરમેશ્વર ॥

અન્યથા શરણં નાસ્તિ ત્વમેવ શરણં મમ ।
તસ્માત્કારુણ્ય ભાવેન રક્ષ રક્ષ ગણેશ્વર ॥

શતયોનિસહસ્રાણાં સહસ્રેષુ વ્રજામ્યહમ્ ।
તેષુ ચેષ્ટાચલા ભક્તિઃ અચ્યુતાસ્તુ સદા ત્વયિ ॥

ગતં પાપં ગતં દુઃખં ગતં દારિદ્યમેવ ચ ।
આગતા સુખસમ્પત્તિઃ પુણ્યાચ્ચ તવ દર્શનાત્ ॥

મન્ત્રહીનં ક્રિયાહીનં ભક્તિહીનં સુરેશ્વર ।
યત્પૂજિતં મયા દેવ પરિપૂર્ણં તદસ્તુ મે ॥

યદક્ષરપદભ્રષ્ટં માત્રાહીનં ચ યદ્ભવેત્ ।
તત્સર્વં ક્ષમ્યતાં દેવ પ્રસીદ પરમેશ્વર ॥

તવ પાદામ્બુજે નિત્યં નિશ્ચલા ભક્તિરસ્તુ મે ।
પ્રપન્નં પાહિ મામીશ ભીતં મૃત્યુગ્રહાર્ણવાત્ ॥

સાધુ વાઽસાધુ કર્મ યદ્યદાચરિતં મયા ।
તત્સર્વં કૃપયા દેવ ગૃહાણારાધનં તવ ॥ (પ્રાર્થના)
ગચ્છ ગચ્છ પરં સ્થાનં સ્વસ્થાનં પરમેશ્વર ।
યં હિ બ્રહ્માદયો દેવા ન વિદુઃ પરમં પદમ્ ॥

હૃત્પદ્મકર્ણિકામધ્યં સિદ્ધ્યા દેવ્યા ગજાનન ।

પ્રવિશ ત્વં મહાદેવ સર્વૈરાવરણૈઃ સહ । (હૃદયસ્થાપનમ્)

ઇતિ સિદ્ધિવિનાયકષોડશોપચારપૂજાસ્તુતિઃ (૨) સમ્પૂર્ણા ।

Proofread by Narendran Madathil

---

*Siddhivinayaka Shodashopachara Pujastutih 2*

pdf was typeset on October 10, 2026

Please send corrections to *sanskrit@cheerful.com*